नं॰ कु

१

ॐ श्रीगणेशायनमः आंदोलदिंदिंदिरत्नं दलितांकुंदस्वतोत्तुंदंतोजयंतः अमंदमानंदमिहैंदिरायास्सखेदं
लोलादृदंतोद्गताः आदौभिधानेकृतकोपधानतिबंधनेनेतिकृथैर्नहेयं प्रकाशहीनादपिरत्नखंडात्कामं लंगोः
पदसंभवास्यात् दिव्यावबोधैरपिदुर्गमेस्मिन्नास्मद्विधानामबलत्वेनिकर्षः नानैवचितीनागभजोप्यगमस्य यत्नुः शा
केस्मान्मशाकेनगतं अस्मिन्ननर्वस्तनिवस्कृतोनो समंजसाःश्रोतशिरोगिरोपि प्रत्यंचमर्थेमनसःप्रपंचोवाचांस
माचामतिकोपिकिंवा स्वीयावबोधावधितद्विलासावधानमद्वाक्रमतं तथानो इतीममर्थंतसमर्थनिर्तावाक्यार्थम
र्थोपयितं घटंते ५ भवप्रवाहार्जितपुण्यलब्धसदुक्तिमुक्ताफलमालिकानाम् रूपांतरापन्ननिजस्वरूपकेशिभावा
य पाराशर्यायनमोस्तुनयेकृतनयेतहीनाय ७ नैत्रीकृताग्निमिवात्कुमारस्सर्जनितमेचरतुभावा कवितामिषेणका
लीवशंगता कालिदासस्य ८ भवभूतेर्वाचिकृतिर्व्यभिचारमचोगिरांगुंफाः विधिनापिदुर्निवारंतेषांत्वेलभावभूतनं
९ यः शाकृणशिशैवधिरवभातिसर्वंशालत्तणान्वयतः गुणमात्रयास्मरमः समदंगुर्वथरनिवंधः १० परिशीलितेवस
रसंकविराजेर्बंदभिरवबाग्देवी वाणीनतवेजात्माकथयतिनामेववाणीति ११ जयतियथाजातानीवाग्ज्ञातस्वजात
परिजातश्रीः श्रीलक्ष्मीधरविबुधावतंसचरणाब्जरेणुकणाः १२ नैसर्गिकीत्वलसब्रह्मणारवडुर्गमात्मनोमाया
जीवहृदस्थतनः साऽत्रस्ततेनयाचतत्त्वधिया १३ आरोपितननियमंसमायाप्रिशुनसमदिविलोका प्रतिपन्नमोपनि

षदैन्द्रवं भावांतरे पितथा १४ तादात्म्येन जगन्त्यपि जनकास्तेषामुपादेयाः समास्फूर्त्यैकपदं ब्रह्मानेदात्मका वितथा
१५ मिथ्याभावविहीनावहं त्यनिर्वाच्यतामनिशं यत्तानानुपथे यामहाकवीनां जयति सृष्टिः १६ न नियतिपर्यंतं शक्रः
केवलमथास्य संबद्धः शुद्धे स्वच्छे तस्यं वेलश्र पंचो न मलिनयति १७ विषमदृशो विबुधानां यानु विदिशावनुपदुक्के
कुंकवयउग्रनिसर्गा दुर्वर्णामदीरयं त्यपि रुदिता १८ विशकलितैः परकीयैः पदार्थजातैः स्वकाव्यविम्यस्तैः याचित
कमंडनैरिव न भवति शोभा विजातीया १९ खलहृदयदर्पणे तैलमालिन्यं जायते विजातीयां गुणसंक्रमणविरुद्धं
दोषोद्ग्राहानुकूलेच २० काव्यमयी विबुधानामंतःकरणस्फटिकनिर्मलेयं यथैवैतममपि प्रतिफलति यथार्थतोयत्र
२१ अस्ति भगवतोऽनेककरज्वलननिर्दग्धमहांधकारकांतारस्य त्रिभुवनभवनांतरैकप्रदीपस्य समस्तचेतनचेतन्याग
मनिदानस्य श्रोतस्मार्ताशेषक्रियाविशेषप्रवृत्तिजनकस्य भास्वतोभ्युदयभूमिः भागीरथी प्रवाहमयवालव्यजन
वीज्यमाना राकारजनिकरमंडलसितातपत्रचिह्निता सर्वासां दिशामाधिपत्यमिवानुभवंती ईश्वरीवस्वामिस्वरूपानां
सर्वकर्मफलप्रदायिनी तपस्विनीवास्थिनैकपदाहरिमूर्तिरिव वाजिमुखान्विता सेनेव वर्द्धमानसुपर्णकर्णोपेताकै
लासभूमिरिव वृषभध्वजाश्रिता लंकेव पुरुषाशर्णोत्कटापलाशाकुसमसंपदिव सलोहिता हरलीलेव किराताश्रि
ता रात्रिरिव प्राग्ज्योतिषोल्लसिता मन्मत्तरिवाश्रितवाशिः नर्मदेव मेकलाश्रिता युवतिरंगिवसां जनान्वसिंहतत्र

न॰कु॰
२
२

विद्यासुमत्वाधिगता सीतेव मिथिलोमतिभिः प्रमनावतीव पुरंदराधिष्ठिता प्राचीदिक् नसांचमगधेषु चार्वाकमतमिवा
द्वितीयप्रमाणं पुष्करद्वीपमिव स्वादूदकमिव गतं विप्रपुरमिव विशालं साहित्यशास्त्रमिव बहुविधध्वनिविचारसहितं
अरण्यपदाष्टापदशालान्वितं शार्ङ्गरीकालवदास्तटमिव लक्ष्मीनिवासस्थानम् ज्योतिःशास्त्रेणेव सविष्कंभेन यमुनारू
देनेव वलभीव्याकुलेन सज्जनमनसेव महोन्नतेन साक्षात्कारेणेव ब्रह्मभाजा कामुकेनेव हृतीतमांगनेन केनचि
द्दुपवाकेनेव सुवर्णचदितेन केनापिव क्लिविशेषेणेव सूर्यकांतेन अमेनांगदेनेव तारोत्पन्नेन अपरेणापि चयनस्थलेनवेष्ट
कामयेन परेणासंनिकृष्टवैदूर्यसमवायिना इतरेण प्रातःकालेनेव पद्मरागमयेन केनचन वीरेणेवोल्लसितमारक
तेनगृहगणेन राजमाने, कुशद्वीपेनेव विद्रुमोच्चयवता हरेणेव शंखमालाधृता नभसेव चंद्रयुजा अपरलोकेनेव मुक्ता
वलिमता राशिगणेनेव सतुलेन शरदृशास्त्रेणेव संपन्नबहुव्रीहिणा पार्थिवद्रव्येणेव विजातीयगंधवता अश्याया
नसमयतेनेव पुष्टतरोमेन नीललोहितललाटतटेनेव ज्वलदग्निशिखिनवा नरबलेनेव श्रेष्ठचंदनेन रागिणेवातिवल्लभ
द्देन दुर्जनेनेवातिलघुनायमुनातटदेनेव संभृतकालीयकेन राज्ञेव संततचामरेण वैद्यकेनेवानेकभेषजशालिना ज
लधिनेव लोकावलिकल्लोलकृतकोलाहलेनापणपथेन भूषितं ब्राह्मणकवनितपार्थिवसमवेतं प्रमेयतत्त्वमिवासंभव
द्विपलवाधं जीवन्मुक्तहृदयामिव संसरणसंकटरहितं ज्ञानमिव नित्यविषयसंसर्गिं जलमिव सर्वतोमुखं विसपद २

सिवद्यासमस्तल पद्मपुरं नाम नगरमासीत् यत्किल प्रमाणानां काव्यविशेषाणां प्रमेयमत्येनाविशेषाणां संशयात्मकं
वात्तषट्दव्यपरिमाणपरिच्छेदस्य प्रयोजनं नानाकार्यार्थिनाम् दृष्टांतो महापरिमाणशालिनां सिद्धांतः समरादिकाश्च
याः अवयवः स्वरलोकस्य तर्कसमूह विषयः कविबुद्धीनां निर्णयगोचरः परमोत्कर्षस्य वादो महेंद्रभवनस्य अल्पप
र्यवसानहेतुरत्येन्द्रकानां वितंडात्मकं परपुराणां हेत्वाभासनकरं सोपक्षोधोपायानां छलहेतुः पाखंडानां निग्रहस्थानं
विपक्षाणां चाभूत् यत्र दृष्टिभिरिव रूपोपजीविनीभिः कविसृष्टिभिरिवालंकारसंस्कृताभिः वरभिरिव प्रशस्तवर्णाभिः
मतांतराणुगाभिरिव दृष्याभिः नरगणाभिमानिनीभिः सिद्धमंत्रावलिभिरिवानेकाकर्षणकुशलाभिः असमकविवाणी
भिरिव सर्वथा स्वरसाभिः दुर्गाभिरिव नववियाभिः सद्बुद्धिभिरिवाप्रविप्रलंभनिपुणाभिः निसर्गावदाताभिरिव कुद्धि
मरागाभिः विरक्ताभिरिव कविद्वद्वप्रणयाभिः प्रणामाभिरिवाहृतलोकलोचनाभिः सत्कविताभिरिव प्रशस्तानेक
घटनाभिर्हिताभिः आख्यानपरंपराभिरिवानेकशुकप्रचारयोग्याभिः जातिभिरिवैकशमिवरहिताभिः स्वनवद्या
भिः सुभगाभिः सुकेशाभिः रतिलालसाभिः सुजंघाभिः सुबाहुभिः सुवपुर्भिः सुरसाभिः सुसौरभाभिः कुसुममिश्रके
शीभिः विलाससहजन्मांजितचित्रलेखां तर्जितपुंडरीकांजनहृदयप्रसादो चंद्रदृष्टिं दधानाभिर्जितहेमांगाभिः स्वन्त
सरस्वतीमंडितवदनाभिः श्रीजितकमलालयाभिस्तिरस्कृतरंभांक्रतस्थलायासमप्राणामूत्रतदी विभ्रतीभिर्वारम

त·कु·
३
3

ध्योमिरश्रुवितमनेकाश्मरोविशेषबाहुल्येनदिवमप्युपाहसत् यत्रस्फटिकभवनाभमंडलेषुदीर्घोदांतरालगतइवनीलमणि
मयूखांतरेषुस्वर्भानुमखंडेंदुरांतवितइवमाणिक्यमरीचिमालासमूर्यमंडलांतर्गतइवसर्वमणिकुट्टिमेषुकृतपरभागप्रवेशाइ
व प्रासादहर्म्यकामिनीवदनसंवलनेनकृतकायस्थइवनिशासुचंद्रमायलसत् यत्रचपर्यन्तरत्नकुट्टिमेषुभासमानःप्रति
बिंबसहस्रमवलोक्यतदन्यतमस्यापिनिरपवस्यानप्रोयानिश्चयान्निश्चिंततांसंतेनुर्विभ्रमपाःकेलिदीर्घिकाचक्रवाकयुवत
यः तत्रवांतराश्रिताऽनेकभूभृत्सहस्रविपत्तवलसागरावमनकुंभसंभवायमानदोःस्तंभः वैतानिकवीतिहोत्रनिर्गतधूमवि
तानवितन्यमानवितानकृतगगनमंडपःश्रवणाभिमुखप्रवणायमानकोदंडमंडलनिःसरन्मार्गणखंडितद्विषदनीकनि
र्गलकीलालधारासमासादनोन्मत्तभूरितरमाप्रमुखकहरनिःसरत्कृशानुकीलावलिनीराजितप्रविदारणांगणदक्षादिदेव
तःशत्रुरिवभूभृत्समस्तारणसमीकृतसमस्तमहीमंडलः युधिष्ठिरइव परलोकागमितशल्यःभीमइवहतदुःशासनःअर्जुनइ
वधनुर्विद्यासुशर्मा नकुलइवजनितशतानीकःसहदेवइवदलितसुरभीकः भीष्मइवनिपातितोग्रायुधःकंसइवनिरुद्धोग्र
सेनः नलइवशजितवीरसेनः वसंतसमयइवस्फुरदतिसौरभप्रभावः कामिनीकटाक्षइवतिरस्कृतकर्णःमहावराहइवहृता
द्विषद्धिरण्याक्षःसमंतभद्रइवजितमनोभूःतालकेतनइवतीक्ष्णभार्गवनयाकर्षकःवत्सेश्वरइवखंडितचंडमहासेनःइंद्रयु
म्नइवभीरुभावभावितक्ष्मापः हैहयाधिपइवभासद्भावर्जितशराग्निदग्धभूलतः नगरइवविश्वरूपश्वरणयोगविभ्रमसर ३

टत्वः शांतनुरिव भागीरथीजनितवसुः अंबरीष इव मंजकेशिप्रसादासादितसुदर्शनः शनैश्चर इव चरणतर्जितविपल
च्छायः किरातदुर्गारजनविधिरिवानमितातमंत्रः जरासंध इव मागधस्तूयमानः शिशुपाल इवानर्घदाजनितमखः नारा
यणनाभिरिव जनितशतानंदः शंकर इव हतारिदर्पकः गरुड इव कृतद्विजिह्ववैरः प्रातःकाल इवोदयमानमित्रः सूर्य इ
वानुगतदंडः वैयाकरण इव संप्रसारितवलयोरवितगुणहृद्विर्निपातितमदस्त्वांतध्वांतः स्ववंशमाक्रांतनिशासहितप्र
श्वालंकारिक इव स्फुटीकृतविशेषोक्तिः सांख्य इवाभ्युपगतसत्कार्यवादः प्राभाकर इव संख्यातीतगुणो नित्यवर्णाश्रयहिर
ण्यकशिपुरिव जनितप्रह्लादः प्रह्लाद इव प्रसूतविरोचनः विरोचन इव प्रयत्नरक्षितबलिः बलिरिव प्रकटितबाणः बाण
इव सौध्याग्रशासमहासेनः महासेन इव शक्तिभिन्नक्ष्माभृत् क्ष्माभृदिवोत्तुंगनानामणिमयकटकः कटप्रदेश इव दंता
वलस्रविगलितमदः मदप्रवाह इव तर्पितमधुसूदनः मधुसूदन इवाश्रितनंदको दित्तप्रयोषितप्रद्युम्नप्रद्युम्न इव
शंबरामरविपदः विपद इवासाध्यः महादोषोऽप्यदोषः सदलीकोऽप्यनलीकः सालंकारोऽप्यनुपमः दुर्योधनोऽप्यजनित
लक्ष्मणः सलक्ष्मणोऽपि विलक्षणः रामोऽप्यभयो प्रशासनः सर्वतोऽपि नभुजंगप्रियः मदनोऽप्यतनुशरीरः अनंतनामाऽप्यद्वि
जिह्वः धनदोऽपि स्तुवीरः किरीटोऽपि कदाप्यलब्धनपुंसकभावः जिष्णुरपि न गोत्राहितज्वलनोऽप्यकृष्णवर्त्मा समवर्त्तोऽप्य
`` णचरणः पुण्यदंतोऽप्यप्रभंजनदिगाश्रितः सार्वभौमोऽप्यनुनरदिग्गतः माल्यवानपि निनालंबितकीनाशकाष्टः इंद्रप्र

त·क्र·
६
५

म्नोऽप्यनधिगतमातंगभावः जगत्प्राणोऽपि लोकलोचनपीयमानस्वरूपः गुणपजनोऽप्यगुरुपादः प्रचेता अपि जलभावहीनः चतुरा
ननोऽप्यनष्टभुजः नयजितकुवलयोऽपि नयनजितकुवलयः स्वजनप्रियोऽपि निःस्वजनप्रियः व्याजरहितोऽपि न व्याजरहितः
यशोभीरुचिरोऽप्ययशोभीरुचिरः समानोऽप्यसमानः नम्राहितोऽप्यनम्राहितः नीतिकारकोऽप्यनीतिकारकः अग्रणीर्गुणशा
लिनां ललामकलावतां प्रवीरः प्रवीणानामसाधारणो धारणावद्धीनां धुरीणो धीराणां मान्यो वदान्यानां प्रवेकभूतो विवे
कवतामृदीर्यश्रौदार्यभाजां महनीयो महोत्साहानामाचर्यो वाचोयुक्तिपटीयसां निधानं दिशो दंडस्य पशुपतोहरः परिपंथि
यशसां कामकः कीर्तेर्मत्सर्यमत्यस्य मनःपरवधेत्वलक्तधर्मेक्षो दुर्विनीतेषु मनःपरवधेमूढो दुर्नये दिग्वश्यकर्णावतं
सायमानयशाः पल्लवो राजा राजशेखरो नाम महाराज यस्मिन्सर्वोर्वरगुणपचरितरत्नाकरे शासति महीं गुणच्छेदो मार्गणा
लेषु अंकप्रचारो गणितागमेषु वर्णव्यत्ययः सात्विकभावेषु संकरोऽलंकारविचारेषु वैषम्यं छंदःप्रभेदेषु रेफस्यार्द्धगमनं
शब्दसाधने प्रत्ययलोपो व्याकरणे जातिनिराकरणं सौगतसिद्धांतेषु ईश्वरद्वेषो मीमांसकेषु सन्निपातनं पाणिनीयेषु
शून्यरूपत्वमाकाशादिषु मिथ्याकिरणयेषु सविकल्पकत्वं ज्ञानविशेषेषु सत्प्रतिपक्षत्वं बाधितत्वं च हेत्वाभासविशेषे दुःख
द्वेषोऽधर्मवर्णनं गुणनिरूपणेषु आत्मसत्वप्रतिपादनं सदागमेषु द्रव्याभावो बुद्धदर्शनेषु प्रकृतस्य यथाभावो निःक्रिया
चेतनपुरुषत्वं च सांख्येषु सत्वमनस्कत्वं वैशेषिकेषु स्वतःप्रामाण्याभावो नैयायिकेषु निरालंबनता नास्तिकमतविशेषे

६

मध्यमपुरुषदर्शनमाख्यातेषु उपसर्गयोगो धातुषु भागहीनत्वं नित्यद्वेषु परार्थहरणं समासादिष्टौ दोषोदयो वैयाकरणेषु उ
उदात्तत्वं स्वरभेदेषु बहुवचनादर्शनं तद्धितप्रत्ययेषु पदाभावो भसंज्ञायां विकल्पत्वमेकभेदे अशक्तत्वमुपसर्गेषु अंगदो
षोनाद्यकल्पस्य असिद्धत्वं त्रैपादिकेषु विकरणान्वयो धातुषु प्रवृद्धभावः पारिभाषिकस्त्रीषु सदेनादेशः इति व्यपदेश इदमेतदो
रन्वादेशः शून्यवादः सौगतेषु महापातकस्मरणं स्मृतिषु व्यभिचारश्चिवर्णसङ्गमेषु मिथ्याध्यवसितिः काव्यालंकारेषु त्रीय
माणता निशीथिनीनायके मनःस्पर्शः शर्वरीषु मलोच्छेदस्तरंगिणीतीरतरुषु कलधौतरत्नमिंद्रवारुणीफलेषु उन्मत्तत्वं ध
त्तूरेषु शैथिल्यं बाहुल्येन विसारेषु कलाहीनत्वं कृष्णपक्षचन्द्रमसि उग्रत्वं पार्वतीरमणे मंदत्वं शनैश्चरे हाहाशब्दो गंधर्वसंसदि
वामनपदं दिग्दन्तिनि दुर्दिनं वर्षासु सोष्मत्वं निदाघे प्रवग्रहो दंतिललाटेषु परपुष्टत्वं कोकिलेषु मधुपत्वं भ्रमरेषु समस्तरत्वं म
त्तिकापर्यायेषु अगुरुत्वं द्रव्यविशेषेषु कुटिलता कामिनीकुन्तलकलापेषु सत्वतत्वं वरवर्णिनीबिम्बाधरेषु बंधस्थितिर्मोहन
विलासेषु सेतुसमुद्बन्धनं वार्षिकजलेषु स्तबकत्वं शुभनिमित्तेषु स्ववर्णपरित्यागो भूषणविधानेषु वामार्गभेदनं मम्महिर
देषु विशृङ्खलगमनं तरंगमेषु मदोद्धतता स्तम्बेरमेषु मलीमसत्वं कृपाणेषु विरोधासक्तिः कृपाणेषु कादिम्बं कुरंगदृशां कुचकला
न्तरङ्गमेषु उद्वेगयोगस्तोमुलेषु लामत्ता वतिमध्यदेशेषु मानोमनकाशिनीषु जाड्यं जलेषु आश्रयाशनं हिरण्यरेतसि
नीचपथगमनं तरंगिणीषु कंटकवेधः केतकीदलेषु निस्पृहा निःप्रसन्नीकेषु पंकसंबंधो जलाशयेषु पोतविनाशः सम

त॰कु॰
५
5

दंडग्राहो भस्मैर्भगीरथादिषु करग्रहणोन्निर्वृतेषु अमरकंटकवंतीर्थविशेषे आश्वासोथकमंतितिमिरे सांनिकृष्टतोशिवविरंचि
रंदेषु पंचतंत्रहृदयस्वेषु अगदंतं मधुसूदने परलोकासहिष्णुत्वं वीरेषु अनिर्मलत्वं भुजंगेषु अभ्युदितत्वं भास्वति निराकृतित्वं
वैरिस्त्रीषु निस्त्रिंशत्वं कृपाणेषु उन्मार्गगामिमार्गणेषु अपानाशंकामावस्यासु मलिनत्वं चंद्रमासभेदे निर्ग्रंथित्वं भिक्षुविशेषे
षु वकवृत्तित्वं तडागेषु स्खलितं विनेत्रे गौणार्थपरिग्रहः शब्देषु न क्रियासु दृष्टदर्शनं सामप्रयोगेषु न संगरेषु नीविमोक्षः सुरता
लयेषु न वणिक्त अदृष्टपर्वतं विशिखत्वं च सायकेषु न तत्र हितक्रियापरेषु निश्वासाविर्भावो रतक्रीडासु न शोकोदयेषु
करग्रहणं विवाहविधिषु न ब्राह्मणेषु दाननिवृत्तिर्दीक्षितेषु न कार्पण्यं यत्नेषु करपीडा सुंदरीस्तनकोरकेषु न प्रजासु पद्मभं
गः कामिनीकपोलतलेषु न संग्रामाडंबरेषु संध्यावर्जनं विपत्तेषु नातिपन्नकालेषु स्थापनप्रयासः शास्त्रकथासु न व्यव
हारे तत्कालेऽसंयोगमधुमल्लिकानामस्तनकार्येषु उत्पातदर्शनं मल्लयुद्धप्रचारेषु न अंतरिक्षादिषु याञ्चा निसारासोमानिनीषु न दा
तृषु अश्लीलभाषणमश्वमेधविधिषु रतप्रयोगेषु च न सद्गोष्ठीषु द्विजपरीक्षणं लक्षणविचारेषु क्षतिलंघनं वसुनाकदाह्वेषु
नर्मकेषु समभवत् यस्य भगवतो महेंद्रस्य तया प्रहते देवासुरसंनिपाते नारायणाश्वनिखिलदुर्जयान्दानवेंद्रान्कथावशेष
तमनैषीत् यस्यैकोपि प्रतापो युगपद्देवदेववैरिसीमंतिनीहृदयेषु पाताले विपक्षराजरमणीहृदयेषु भूतले प्राज्वलत्
तस्य च स्मरस्वतीवाक्षितचंद्राननानाम्नी विप्रोल्लसितपद्मकरा गौरीव भूभृद्दरोत्पन्नादेवसेनेव बहुल्यापस्मारा पौलोमीवा

५

भूतशातमन्यो लोपामुद्रेव कांतागमस्थानवद्रोमवारतिरिव पंचबाणसंचरणभूमिः सीतेवानधिगतयोनिसंकरा अरुंध
तीवाविर्भूतरूपशक्तिः लंकेंद्रदयितेव मंदोदरी तारेव प्राप्तसुग्रीवाद्वैपदीवलब्धवेदिमध्या रेणुकेव रामाभ्यर्हिता संज्ञेव
स्वप्रतिनिधीकृतस्वांतराछायेव संतापहरूपा सत्यवतीवोल्लसितव्याससविचित्रांगदा अंबालिकेवाश्रितहृतराष्ट्रा पांडुतले
वसदाशुभरतादेवयानीव काव्यजन्मभूमिः संध्यावलीवाधिगतरुक्मांगदा विनतेवारुणाग्रजनिरसत्ताकरुक्मिणीवमन्मथ
जननी प्रभावतीवरतिकांतानुरक्ता उषेव प्रियानिरुद्धा सुभद्रेव जिष्णुदयिता अभेदपरिशिलितलक्ष्म्यसर्वभावामरादेवीम
लयवतीनामासीत् तथैव वैयाकरणाना देवसंधिविग्रहतत्त्वज्ञः रूपशास्त्रविज्ञाना देवनिर्णीतयानरहस्यस्सिंहवा
देवप्राप्तदेवीभावः योगागमबोधादेवात्मसनसारकोविदः सर्वार्थ्यणीयतादेवलब्धाग्रयभावः वसिष्ठइव सम्प्राप्त
गीतशक्तिः बृहस्पतिरिव विबुधगुरुः भार्गवइव कविपदवाच्यः सर्वविद्विवसात्मात्कृतपराभिप्रायः उद्भान्तेव सामग्र
योगाभिज्ञः वारणाइव दानोत्पत्तिभूः वैशेषिकइवतित्वोभेदपरमार्थः गृहपतिरिव नित्यानुगतदंडो द्वादशमंडलगा
तिश्च सांख्यइवाभ्युपगतपुरुषभेदः द्वितीयमिव रात्नोदयं मूर्तिमानिव विश्वासः तादात्म्यमिव नीरक्षस आश्र
यांतरमिव राजबुद्धीनां उत्पत्तिस्थानमेदइव राज्ञाज्ञायाः हेतुरैतमिव प्रतिपत्राजभीतानां विषयभेदइव लोका
नुरागस्य अपकर्षनिरूपकावधानंतरमिव सामंतानां उद्देश्यंतरमिव राजप्रमाणानां प्रधानामात्यो बुद्धिसिंहः

नकु
९
6

समभूत् तस्य वरात्मा वशीकृताखिलपरिपंथिसार्थस्य उद्गमनशीले वसुधालोके गुरुत्ववतीव पाताले संग्रहस्वभावेव पर्वत
तटेषु प्रसारिणी विभ्रमे सवन निसर्गे च समदेषु नक्षत्रविदपि व्यहन्यत काचिदाज्ञा ॥ कार्त्तिककुमुदबंधवकौमुदीवोदय
गिरिशिखरेषु चंदनद्रवधारेव मलयवप्रेषु सुरासुरसमांदोलितदुग्धसिंधुक्षीरोदधिप्रवाहपरंपरेव मंदरसानुषु तन्मारा
जिरिव गिरिराजप्रस्थेषु दुग्धाब्धिकायप्रहरहरवजलनिधिषु श्वेतद्वीपताराम्यमिव द्वीपांतरेषु प्रसृतहरहासमंततिरि
व कैलासभूमिषु जाह्नव्यभेदरवनयंतरेषु शेषभोगकांतिप्रचयरव पाताले कुमुदद्दलावनस्येव कुमुदाकरेषु पेसवन
रुचीनामाश्रयमिव धारस्वामरावस्मा चंद्रमसः स्वैरनिर्यातनमिव रातसराजनगर्य्याम् जलीयरूपाद्वैतमिव वरुण
लोके त्रिनयनसारूप्यमिव राजराजराजधान्यां रूपांतराणां सजातीयसृष्टिविच्छेदमिवाभिभवमिव लोपमिवायोग्यता
मिव सन्निकर्षप्रतिबंधमिव सालोकारसामग्रीवैकल्यमिवोपेक्षामिव विस्मृतिमिवोत्पत्तिस्वरूपायोग्यतामिव युगपत्प
रिहृतिमिव द्रव्याणां रूपांतरनिरूपितकारणताप्रत्याख्यानमिव शौक्ल्यस्यैकव्यक्तिकत्वमिव रूपत्वसजातित्वनिरासमिव
सर्वद्रव्याणामभेदमिव दोषाणां पीतत्वादिभ्रमजनकत्वमुद्रासमिवाश्रयाश्रयत्वं विनैव नानासंख्येनलपरमाणुरूपस्यात्यव
मिवेंधनादिरूपस्य वह्निरूपाभिभवशक्तिप्रत्यादेशमिव कालिंदीजलेषु श्यामाभावशंकानवकाशमिव पृथिव्याः सामान्य
रूपवत्तानिराकरणमिव विरचयंती कीर्तिरभूद्दलमत्र ॥ केवलान्वयिधर्मस्येव न कोऽपि विपक्षता मानतनानपरं न सपक्षता

मेव सर्वेषु गुणगणेषु त्रिभुवनवर्तिनः पदार्था उपमेयतामेवानुभवितुं योग्यतां दधुर्न पुनरुपमानताम् तस्यैवं जाती
यकविशेषशालिनोपि शत्रुत्वमिति कृताहतशेषपातालपलायितदानवेंद्रनिवहेणाविषयिणीचेतिदृष्टी चिंताचेतसिप
दं बबंध एकदा तु तस्मै महीतेंसहस्रमिव कुलपालिकाहृदयमिव शुकरूधान्तरप्रवेशहीनं पंडितमिवानिगूढपदान्तरप्रचा
रं प्रबलमत्सरमिव मंत्रोत्पत्तिस्थानं श्रवरस्थलमिव सहचरितवेदिकं जीवन्मुक्तमिव प्रपंचासक्तिमुक्तं निशासमयमिव प
तंगहीनं प्रयोगविशेषमिव शब्दनिर्गमप्रतिबंधकं सच्छास्त्रमिव शीघ्रतेयान्तरं भ्रमप्रवेशानर्हं तयासिंहाक्रांतमिव समंदी
मिव पातालविवरमिव तमसा गृहसंस्थानमध्यासीनो राजा दमावथानं नृपतिं निशि समवदत् विज्ञातमप्येतदार्य सम्यगस्मायतिर
ह किल कर्मणामविच्छेदेन प्रतायमाने संसारे जीवानां सुखदुःखोपमतरभोगायतनं देहरूपशरीरपरिग्रहः समुल्लसति। तत्र
च मनुष्यभिन्नाः सर्वेपि प्राणिनः पूर्वोपार्जितकर्मसंतानोपनीतसुखदुःखानुभवमात्रव्यापारिणोऽनंतरकर्मोत्पत्तिप्रबंध
विकलाश्च मनुष्याणां तु प्रारब्धवीयकर्मभोगो विधिनिषेधाधिकारश्च तत्रापि त्रैवर्णिकानामेव सम्भवो विषयकोन्येषां तु
प्रतिनियतकर्मसेवतत्र चोत्पत्तिसमयप्रवर्तकरणत्रयमनुवध्नाति तत्र च यागस्वाध्यायादिकर्मसाध्योत्करणहृदयापनोदश्च इति
धर्मशास्त्रविदोभ्युपगच्छंति। सत्वममापि प्रायेण संजात एव यमपि अनंततीयमणोनस्य स्वमात्रपरिहार्यमिति तन्निदृढोहं सक
लातिशायिनीमपि संपदमिमां न बहु मन्ये। संपदो हि चलप्रायाः कालक्रमेण विभवंतीति तिरोभवंति च नासां हि सङ्गा

वेगस्तव विशेषोऽभावेन न कश्चिदपानिष्टलेशः उन्नतो नतोत्कर्षग्रस्ता एव हि संसारे सर्वोत्कर्षाः तदभिज्ञात लोकतत्त्वानां क्रियान्तेऽप
१ त्यवहमानावकाशः यत्तस्याभावेनानिष्टजनकं तत्रैव महतामादरोपनिबंधउचितः विजातीयानां च कर्मणां प्रतिनियतफ
7 लजननस्वभावतया एकोनमफलसंबंधेऽन्येनापि तादृशेन भवितव्यमेवेति निर्णयस्तन्नष्टो तेन तस्माद् उदयमधिरोहति । यच्च पु
रिनिर्जिता अपि महेंद्रवैरिणो दानवेंद्राः पलाय्य पातालमपि विवसंति तदपि किंचिद्विशल्यमत्र हरति यतोऽग्निरिपुरोगाणां शो
षोऽपि शन्वयमिह हिमासाद्यमहते विदायकस्तत इति चिंता हृदयं विषयांतरसंचारप्रतिबंधसर्वंकं समनुसतीति । एवमभिधाय
वितत वचसि निराजनीतिकुशलो गुरुर्विवार्यानपेतपदप्रायमवादीत् । चिरं निरूप्यमाणेऽपि न मम कश्चिदस्ति विषयो योऽदे
वस्य दुर्दैवात्तायाश्च गोचरतां नानुभवति तथापि देवस्येच्छाप्रतिहतिवारणार्थमेवममवचनपरंपरा । तथा हि यातनावदियं
द्वितीया चिंता देवस्य हृदयेऽभ्युदयमासादयति तस्याः ईषत्कर एव प्रत्यपकारः । न हि दानवानां दुर्जेयत्वमत्र निदानं स्वर्गमप
हाय अपक्रमणेन सर्वविदितेन दुर्जेयत्वस्यैवासिद्धत्वात् नापि तेषां पुनरुत्कर्षशंका सर्वकालमेव तैः स्वगाणीकृता विलोपा
या का नाम मायानामापि प्रबललोकालोकितोऽपि को वा लोको न विकलीकृतः मोघीकृतसर्वशास्त्रं किमहदस्त्वेन सरस्वी
कृतं जगत्त्रयेऽपि सर्वोऽभ्यर्हितः को वा स्वपर्वा न गर्वापहीनो विहितः अपि जन्मभूमिको वा राजन्यः स्वजन्मभंगाद्विषयः स्या
पितः प्रतिचिरंतनमपि किं नाम रत्नं प्रयत्नबलान्नसायतमायविते यदि चैतादृशप्रभावस्य मयोऽपि तेदेवेन पराजिताः स्ता कि ७

मतः परमपि तेउत्कर्षोन्तरमासादयिष्यंति येन तेषां तु कल्पद्रुदत्तशंकाकलंकसंकरः संभवेत् ॥ यदि च वीरस्याभावेन तेषां
सतामात्रमपि देवस्य मनसि नाभिरोचेत एवं च तद्ध्येयत्वाविलंबमाशादेवतद्विलंब इति स्वकीयेच्छान्वयव्यतिरेकानुविधा
यिनि कार्ये को वा दैवे र्मनस्यस्यावसरः ॥ यान प्रथमावितादेवेनोपसन्ना मानभ्यर्हिन विषयैव गार्हस्थ्यपरिग्रहो हि वि
षयोपभोगमात्रप्रयोजन इति रागिणामभ्युपगमः परमार्थदर्शिनां तु यत्नमेव तस्याभाथरणं फलमिति तत्र तावत्स्व
पयोग्यतामवाप्नुवनेनैव परिक्लिश्यते फलोत्पत्तिस्तु सामग्रीसमवधानाधीना सामग्रीघटकं च तदनुकूलमदृष्टं प्रतिबं
धकदुरदृष्टविरहश्चायोग्यतयाप्यत्वानधिगम्यमेव तत्र देवस्य संन्येव दिव्यलोकसंचारसंभवेन सकरप्रार्थनाखिं
नामणिकल्पवृक्षकामधेनवः यद्वाहंदारकविपक्षहंदनिर्दलनोद्भावितनिर्मर्यादपरितोषविशेषो भगवान्वयस्य
भूतो देवराज एव अथवा देवस्य संसृदिसर्गस्थितिसंहरणसमर्थाः सर्गान्तरोपजननशक्तिमंतोऽर्थाय मिवादिवच
सो ब्रह्मकल्पा महर्षयः सहर्षं समवयंति तैरेव तनयोत्पत्तिमंतःसिद्धस्य वैदिकं कर्म निर्मायं निर्मीयतां स्मर्यते हि रा
ज्ञो युवनाश्वस्य वितते पुत्रीयकर्मणि संस्कारविशेषविशिष्टे पयसि प्रमादाद्यजमानेन राज्ञा पीते तत्कुक्षेर्वाप्रतिमप्र
भावो मांधाता समभवत् तथैव ऋष्यशृंगेण मुनिना दशरथस्य पुत्रकाम्यया तदनुरूपक्रियाविशेषेष्वविहितेषु सति
भगवन्नारायणांशसंभूता रामलक्ष्मणतनयाश्चत्वारः पुत्राः समजायंत पांचालराजस्य च द्रुपदस्य द्रोणवधसमर्थपुत्रज

मेने त्वया याजोपयाजाभ्यां मन्निर्मापय यावत्परिनिष्ठापितायां प्रज्ञीयायामिष्टौ धृष्टद्युम्नो द्रौपदी चेत्यपत्यद्वयमग्निमध्याद्देवस
८ मदतिष्ठदिति । अथवा सकलजगदंकुरबीजभूतेऽषु सर्वातिशयेहतमसानत्कर्मात्र्यपभोगसंपन्निजनकोऽपरिछेद्यात्रभावैक
४ देशो भगवान्भूतनाथ एव केन चिद्भुतविशेषेण परितोषितो । तदेवं तनयोत्पत्त्युत्कलात्स्वजनकाः प्रतिकूलतद्विध्वंसहेत
वो वरवडपायाः सलभा एव देवस्य । तत्किमिति तत्र प्रयत्नमपहाय मनस्विंतास्पदं क्रियते । संतति च देवस्य तादृशानि चिह्नानि
पैरीश्वरावतारभूता लोकोत्तरकर्मकारिणो महोत्कर्षशालिनो महात्मानस्तनयाः प्रादुर्भवंतीत्यलमनया चिंतयेति । एतदाक
र्ण्य परितुष्टहृदयो राजा यथाविहितमार्येण तत्प्रमाणमित्यभिधाय तेन सहैवोत्थाय ततो निरगमत् ॥ अथात्र रागातिशयो
ह्लासितबुद्धिधाराजनितसात्त्वाकारप्रचयबलेन सर्वतोभावितत्वेन वसुंधरया बहुशो मनसि स्थापितमिवात्मानं प्रतिबिंबस
हस्रेण वितन्वत्स्वच्छानेकदीपितिदंतुरीकृतपद्मरागोदितात्रविंबनत्वेन हरनयनकृपीटयोनिमध्यगत इव कुसुमबाणो भ
यविशेषमग्यदानवस्थभावनाबलेन सर्वतोजातस्वरूप इव प्रतिबिंबसमुदायछलेन भूजठरांतर्गतः सैतनयनस्काम्भर
निवर्हणसंजातसंरंभया भूम्या स्वयमंतर्गमित इव मीनकेतनो त्सवन्नतभवभक्तिबलेन तन्मूर्तौ धरायामिव जातप्रवेशस्मरण
योरतिमार्दवेन मार्गसंचरणाय तत्प्रतिबिंबमिषेण कमलसंततिमिव प्रकाशयता मणिमयकुट्टिमपथेन । क्वचिदतिप्रसृमर
मरकतमयूखमालाभिरिव जाततिमिरसंपर्कमपतः समस्तवरमाणिकाकिरणसहस्रेण जातप्रकाशं क्वाप्यतिस्थूलनीलो ८

पलसहस्रेण संजनितजांबवफलसंवलनेक्षुविदराजस्काभिरनिमेषाभिर्दिव्यरूपाभिः शालभंजिकाभिः संपन्नासिंहासंदरीस
मवायं वर्षविशेषैरिव दिव्यमात्रप्रसंचारयोग्यैरलौकिकातिशयवद्भिरंतरमंडपविशेषैः सर्वतः परिच्छिन्नं बहुविधरत्नखचितनया
तज्जनवैरिविक्रमिमद्रुमविशेषैः साधितकल्पद्रुमान्वयं सूर्यश्वसमेरुमास्थानमंडपमवाप्य तस्य मध्ये निस्फटिकोपलमया वि
लावयवस्सोभयतोभिमलेखस्सवरकिरणसमूहसंघट्टनेनानवकाशस्येव विभाव्यमानस्समंथनभयेनाप्य पलायितस्सद्रुग्धसिंधु
भागविशेषस्येव रावणभंजोल्लासनग्रामादपगतस्येव कैलासैकदेशस्यराद्गम्भावकंदरांतर्गतिभीत्यस्थ यत्क्रान्तस्थापितस्येव चंद्रि
कामयं चसस्यस्थलविशेषस्समध्ये चंद्रलोकभ्रमेणोपगताभिरिव तारकाभिः कंदर्पबुद्ध्यातत्तेव नायवसंतेन प्रहिताभिः सिंदुवारस्त
बकपरंपराभिरिव मौक्तिकजालमंजरीभिः संजनितोपांतशोभस्य चंद्रकरतंतुजालेनेव समवायिना समारब्धेनोन्नमसिचयवि
शेषेण निर्मितस्य पेरावतदंतचतुष्टयस्य वस्तंभचतुष्टयेविषक्तप्रांतस्य वितनस्याथस्तात् दानवभयाकुलतयातत्समाराधनार्थंस
मागतमिव सुमेरोरेकदेशं मदनभ्रमेणास्यापराधतिरस्करणार्थं मञ्जितदाहशलिकमिव वक्रिकूटं सिंहासनं तच्चरणसंपर्काद्गाग
तिशयसमासादनार्थमिवागतेन पद्मरागमयेन पादपीठेन गीर्वाणसार्वभौमस्वस्याधिरोहणेन सनाथतामनैषीत् ॥ तत्क्षणादे
वचनस्यास्थानमंडपसमागमनसूचको मंदमारुताघूर्णितजलनिधिध्वनिविचित्रो भेरीडुंडुभिध्वनिराविर्बभूव तत्क्षणसंभृतसं
भ्रमाक्षयुगपदुपेक्षितप्रथमप्रस्तुतवस्तुप्रसंगाः कुसुममयाशेरः शेखरचलनाभिघातोच्चलितैस्समधुकरारकुलैर्नभसि मंड

लवंधेन श्रीखण्डोपसर्पणार्थमातपवारणाय वितानमिव वितन्वानैर्गुञ्जितमिषेण विलं वितन्मपसरनेति प्रेर्यमाण इव मार्गस्पाति संवाध
९ तया पुरस्ताद्दंतमसमर्थतया स्खलत्पुरः प्रस्थितराजालंकाररत्नप्रतिफलनमिषेणेवाग्रतो जिगमिषंतः स्फटिकमणिकुट्टिमोदितप्र
१ तिबिंबकैतवेन पातालमार्गेणेव प्रयमंप्रयातुकामाः स्वगमनप्रतिबंधकमनूपालनोदनार्थमिव तदाभरणमणिप्रतिच्छायाछले
न कृतकायाश्च वसुकीयालंकरणरत्नप्रतिफलितत्वेनैव पश्चात्कृताः थिमराजकाः प्रतिबंधकनिराकरणोद्धैपैव परस्परमभ्रषणासंघ
ट्टितमाणिक्यमरीचिमंजरीभिरंतर्हितपरस्पराः अग्रतो गतराजनोदनोपयुक्ततयाऽगणितस्वनोदनव्यथाः स्वशरीरमिति पर्यामा
पिकदेशव्यापकत्वक्रोधादिवान्योन्यसंघट्टनविपातितभूषणोत्कराः पश्चात्तनराजप्रयुक्तनोदनरक्षार्थमिव तदलंकारप्रतिफल
नमायया कृतांतरालाः परममहत्त्वस्पर्द्धयेवाणुमात्रमप्याकाशांतरमददानः सामंतभूमिपालाः स्वस्थानाधिरूढयानदातेयव कृत
नोदनां मौलिमालां शिथिलतां प्रापयंतस्तद्गरिमविशेषाक्रांतानीवेन मांगानि नामयंतो हृदयपरिष्कारकमणिप्रतिबिंबितताट
शशिरस्कत्वेन मानसमपि स्वापकर्षाभ्युपगमस्रुद्भावयंतो जयशब्दमसकृत्सारणपूर्वकमादरेणातिमहीयसा प्रणेमुः ॥ तांश्च सेवकभावा
पन्नानपि महानुभावतया राजोचितेनाचारेण संभाव्य तत्तदनुरूपाभिः कथाभिर्यावद्दासांचक्रे तावदेव विहायसि दृष्टिपातप्रकाशि
तसौदामिनीसमुदायं जलधरखंडमिवाकांडसमुन्नद्दंशपाभिकापिहितमिहिरमहस्त्वसंचारं कालायसशैलमिव स्वेच्छया संचरंतं श्या
कायामिवमूर्ततापन्नं समुदायमिव जगद्वर्तिनीलावयवानां भंगुरभ्रुकुटिभीषणभालाभोगं जन्मभूमिमिव भयानकं विदंति व ९

रितमपसरंतं रजनीचरमपश्यत् । करे च तस्य प्रसारिणा प्रभाप्रकारेणोद्गसता रसविसरेणेव लिपंती दिग्विभागानम्बरभवनेपि
दुर्लभेनाकृतिविशेषेण तडिल्लतामिव विभाव्यमानां गगनमनवेगशिथिलकेशबंधोग्रैवेयकसूत्रे कहीरप्ररोहसूचीशिखा
निवोतां चलतयालंबमानोत्तरीयसिचयां सिद्धमार्गावगाहनजन्मना साध्वसेन दमहस्ततया बहुगुणीभवता तदपहरणभवा
भयेन निमीलितनयनां श्रमप्रतिपन्नास्वेदबिंदुनिवहां मौक्तिकनिवहामथाक्रमं विसृजंती श्वाससमैरभाजसारिणीभिः स
श्वौभिरिव गृहीतदेहां नरावलिभिर्मधुकरावलिभिरनुबध्यमानाम् । हृदयमिव महोच्चलंतात्टशगतिभंग्रेनायकमार्गीं सृजंती
सरसतनराग्निश्रमविशेषानिव नयनोदबिंदुनिवहान्मुंचंतीम् । भ्रमरहितेन वितानविशेषेणेव श्रवणावतंसकमलेन ह्रीय
मानां संबंधसंक्रांतदुःखैः स्वदद्भिरिव हृतिविमुक्तैर्बिंदुभिरनुगम्यमानां अपर्यंताभिरंतर्बाधयताराभिरिव निःश्वाससपरंपराभि
राध्यास्यमानां इरिणैकनिबंधनेन भयहेतुना रात्रसांतरेणेव कंपेन गृहीतां आसादितावसरांतरेण निर्यनाभिलाषेणेव
वैक्लव्येन वशीकृतमानसां रजनिचरदेहप्रभासमूहेनेव मोहांधकारेण तिरोधीयमानां कृतकलकलैर्यामिकैरिव व
लयेन गृह्यमाणां क्रियाविरोधिना परममहतेव स्तंभेन संभाव्यमानां चंद्रसुंदरेणेव वदनेन दिवसेपि सितपक्षां तिमप्रदो
षसौभाग्यमासंजयंती केशलापेन मेचककृष्णामरस्यापामरभावमङ्गावयंतीं भालतलेन शशांकशकलेंकलंककलुष
मावेदयंती भ्रूलताभ्यां केलतीकामुककार्मुकमकर्मण्यभावमानयंती विलोचनाभ्यां नीलोत्पलपलाशमालामपलयं

नकु
१०
10

तीश्रवणाभ्यांमदनस्यपाशवन्तामिवसंपादयंतीकपोलफलकेनदर्पणादर्पमपकुर्वाणांनासिकयातिलसुमनसांवैमनस्यंप्रसंज
यंती कपोलफलकेनदर्पणादर्पमपकुर्वाणांनासिकयातिलसुमनसांवैमनस्यंप्रसंजयंती दशनभासादाडिमबीजानामबीजा
मिवकांतिमावहंताणां बिंबाधरप्रभयापद्मरागाणांछद्मरागतामभिव्यंजयंतीकंठतलेनकंबुनामेवराशिप्रवेशमपदिशंतीम्
बाहुवीरुद्भ्यांमृणालीमपितृणालीकमानमानयंतीम् कुचाभ्यांकलधौतकलशयोःसकलमपिसुखमाकलापंशाकलभावं
प्रापयंतीम् त्रिवलीललितेनावलग्नभागेनभागीरथीतरंगभंगुरंगगनमवगणयंती नितंबबिंबेनमणिशिलारामणीय
कमणीयस्ययासंयोजयंतीचरणाभ्यामतिलोहितनलिनंतिरोहिताहंकारमाचरंतीम् नखमयूखलेखाभिःशशांकखंडखंड
नलेखानिवलिखंतीम् श्रियमिवदुर्वाससोमुनेःशापेनाकृष्यमाणां सुधादीधितेरधिदेवतामिवतिमिरसमुदायेनगृह्यमाणां
विदेहराजदुहितरमिवदशाननेनापक्रियमाणां भानुमतीमिवनिकुंभेननीयमानांचंद्रकलामिवस्वर्भानुनाभिभूयमानांपारि
जातमिवैरावणकरेणाक्षिप्यमाणां देवसेनामिवकेशिनापवाह्यमानां पांचालीमिवजटासुरेणाकृष्यमाणां वेदत्रयीमि
वमधुनाविधूयमानामनन्यसामान्यकामनीयकांकामपिकन्यकामवलोकयत् ॥ अथापन्नवत्सलतयावीररसोद्रेकेणचना
दशाव्यतिकरानोचितसत्तानेनचतद्रूपनिभालनोद्भवेनाद्भुतेनचनवरितरमारायशरासनंसंधायचाजिस्पृगममोघंविश्रव
योयतोभगवान्मृगांकमौलिरिवसंस्थानविशेषशालिनाशरीरेणास्थितावासितावैलक्ष्यापेनरक्तनेत्रवकन्यकांदाशरथिरिव १०

दृष्ट्वा संतप्यमानोऽश्वमेधचनादं नीलश्चवपरस्तं हन्तुमानिवादेशात्तुद्धश्चवलवर्णाकर्णाश्चवचदोकचंभीमश्चववकंतरान्तसापसद
मवसानमतयान् ॥ अथ तयोर्मध्ये कन्यकाननकालोपगृहीतभूमिकान्तरे वशैलखीकृंतलकलापं जटारूपेणाचीनां शुकं हसा
जिनात्मनाहारवीरुधं यत्नसन्त्रस्त्ररूपेणालावण्यविशेषंब्रह्मवर्चसाभेदेन परिणतं विश्राणो मुनिजनमारः समपश्यत तं चाव
रतलादवतीर्य स्वामिमुखमायान्तमवलोक्य विस्मयस्तिमितमानसो राजा दूरादेव प्रत्युत्थाय मुनिजनोचितया प्रणामादिक
याप्रतिपत्त्या विनयपूर्वकं प्रतिजग्राह सततदशनचंद्रिकासमुदयेन तनयान्तरदयतिमिरं निर्मूलयन्निव महीभुजो मानसा
त्सिंचन्निव सुधामयेन मधुरतरेण वचसा विहितानामन्त्रयान्तयोगो विस्मयविशेषवितानतनूर्तिस्वहृन्न जितासो राजानमवा
दीत् ॥ देव श्रूयतामयं वृत्तान्तः अस्ति कैलासस्य कुक्षिदेशे क्वचित्कलानिधिकलालंकारस्य क्रीडाकाननम् यत्किल कल्प
तरुकदंबमकरंदसीकरनिकरव्यतिकरकलितकोशालमधुकरकुलकोलाहलाकुलं शारवणमिति गायंति पुराणविदः
यत्र चात्र यः कोऽपि पुरुषजातीयः प्रविशति स स्त्रीत्वमविकल्पितमाकलयिष्यतीति भगवत्याः सर्वमंगलाया वचसा स द्यु
म्नस्य राजर्षेरिलाभावः संबभूव तस्यामेव चावस्थायां बुधसमायोगात् दुर्वशीनयनव्यापारविश्रामास्पदं पुरूरवाः समुत्पेदे सोऽहं
विंदुसरसि तपस्यतो महर्षेर्गृत्समदस्य सविधे गृहीतब्रह्मचर्यस्तपोनिधिसंततो बहून्वत्सरगणानवात्सं एकदा तस्मिदार
रण्याय प्रस्थितो हरतरंगनदहलादिमतया श्रमैस्तद्वनं प्रविशन्नेव स्त्रीभूतमात्मानमद्राक्षम् ॥ अथ चरमाचलतातप्रस्तुतच

त.क. उरागपुनरुक्तपाटलिम्निलोहितायमानेसांधिवेलेसावित्रेतेजसिप्राप्तायामग्निहोत्रवेलायांतपोवनाभिमुखेषुप्रवृत्तकुशसमित्फल
केषुप्रत्यावर्तमानेषुतापसकुमारेषुएकेनव्याक्तिविपर्ययेनद्वितीयेनचमयासमयानुपगमतिवंधनगुरुक्रोधसंभावनपावके
११ नदह्यमानोयावन्नसवर्तेतावदेवकश्चिद्दुष्टकोमानसकेनजामायदृत्यागिरिपरिसरोपरिभ्रमन्मदर्शनद्विरगोनममन्मथमथो
मामुपलोभयन्स्तांनवांकैरगृहीततत्प्रार्थनेमयिबलादेवंतकामोदिग्गजकराकारेणकरेणवेपमानांकमलिनीमिवपलाशेकरे
मामग्रहीत् प्रथमयोक्तंयस्मादसमयेमांधर्षयितकामोसिततोबहुतरांकालकलामभिव्याप्यस्वकर्मानुरूपंराक्षसभावमेवनमत्र
भवेति सततात्तामममार्षेसामर्ष्यलज्जाभयोभयपराधीनचेतास्तत्कालोपनतराक्षसदशस्ततोदेशादपासरत् तत्रैवांतरेमदश्याग
मनविलंबकारणंपर्येषयन्भगवान्ल्लमदोमयासहवनमभ्युपेतेभ्यस्तापसकुमारकेभ्योममतादृशींव्यतिकरमवगम्ययोगदृष्ट्या
वगततद्वृत्तान्तस्वाभ्यधात् वत्समोऽस्यलज्जयानोपसर्पसिस्मांस्तपोनिधिस्तमपगमस्त्वेंद्रियदत्तानवशान्तवेयंदशासंभूताऽत्रा
ऽतोमयाशापस्योनरोऽवधिर्विधीयतेयोयंभवदीयादेवशापाद्दुष्टकोनिशाचरतांप्राप्तस्तेनक्रियमाणोनंयदायःकश्चिल्लोकोत्तर
पौरुषस्तंहत्वामोचयिष्यतितदात्वसस्वरूपंप्रादुर्भावयिष्यति तेनापिचपरमार्थयोषिद्दुष्टैववनायेप्रवर्तितमीरमानेनमानसकेनना
नस्मात्तममनंतरमेवविमुक्तराक्षसभावेनभवितव्यम् परंतद्वितीयजन्मन्यवथानेनतस्यस्वरूपलाभेनभाव्यमिति अथहंततन्त्र
त्वोदितद्भगवतोऽनुग्रहवाक्यमाकर्ण्यहृतार्थमात्मानंमन्यमानोमहामनेस्तस्यैवाश्रमपदादनतिदूरेवणपतनमेववनेनिवसस्तत्रम ११

एवंदिव्येदेवतायतनेभगवतीं हैमवतीं ह्रीस्वरूपोचितया गांधर्वविद्यया विशिष्टोपचरश्चितानरमासम् तत्रचविद्याधरेंद्र
स्वच्छंदकेतोरविकाचरणोपचरणमाहात्म्यादुपनताकन्यामंदारमंजरीनामसहसखीभिर्विशिष्टगुणावर्द्धकामनयातामेव
भगवतीमत्यहंनियमेनसेवमानाकदाचिन्मामवलोक्यजातविश्रंभाविदितमदीयावदानाचमामपिस्वसहचरीपदमवाप
यत् बलादेवचात्मसमेनभूषणादिनासंमानयामास सततनिशांचरोदशांतेरपिसर्वसंस्कारवशंवदतयामदुपादानमस
नाम्नैवविरराम नशशाकचरतोऽन्नमेतत्कृतरहंसोमसमभमपहर्तं अथयतज्जातनिर्वेदतयातत्प्रयोगपराङ्मुखंमामतर्कितोप
ननुपवादायतनजातेकुत्रगंतमिच्छतिकिंवाद्यविकीर्षतीतियावदुन्नमार्गेणविहरतितावद्देवदेवतासदृशानुभावेनदेवेन
कशरप्रहारेणतंप्रमापयताद्यावप्यावांसदूषणेनराडस्मोचितेविति तद्देवंविघटतिदुष्टतरादिपदुदन्वतःसमन्मारणातिमिस
समभवतः किंचिदपिस्पृहणीयमर्थमस्मिद्वेनपश्यामियेनलेशतोऽपिप्रत्युपकृत्यकृतन्नकलायामपाकुर्यःस्याम् तदात्मान
मिवागणेयगुणगणगरिमाणंत्रिभुवनाभयदानशौंडंशांतनुविवभीष्मंसनामेवयतंजयंभास्वानिवकर्णमैंहंद्रविद्विषो
विमर्दनलब्धलब्धसमात्मजारत्नेजलनिधिरिवजैवातृकंजनयज्जगतोजीवातुमिति राजानेवमभिहितवतिमहर्षौहर्षोल्लास
परवशोऽवगाढगाढमथारसस्कंदईश्वरस्मातलात्सर्वलोकोपरिष्ठात्रीतस्त्ववस्तविनयमभिहितवान् इदंतदविलोकितव
लाहकंवर्षप्रविभावितविभावरीकस्पंदिकोल्लासः अनाकलितकलेवरांतरंनाकलोकावलोकनं अनधिगतविद्रुथा

५.२.

तं·कु·
१२
12

स्पदे(?)स्तथासमाश्वासितं यदस्मादृशैर्मोहतिमिरिकापिहितदृष्टिभिः अल्पदृशांभवादृशां भगवतामेवंविधदर्शनानामेवद्वणं तन्मात्रे
णकृतकृत्यमात्मानंमन्यमानानांचपुनर्मनोरथपथातिवर्तिवरलाभः सुतरामेवविस्मयप्रमोदौसमुद्वेलयति नकलयामिचत
थाविधमात्मनः सुचरितंयेनैतावतः प्रसादोत्कर्षस्यपात्रंभवेयंतथापिभगवतामनुपधिः परोपकारस्पृहैवात्रप्रभवति एव
मनुग्रहविषयतांनीतेचमयिपुनस्तदापादनप्रार्थनमात्रेणतरलतामुपयातिहृदयेनुबद्धमिति सततमनिर्निशाचरग्रहमो
तापेनयापिदितितिपतेरनुभावविशेषेणसुतरांप्रीयमाणोः अमृतकुमारजन्मोत्सवंदेवंपुनरुपाध्यायसमीपापसृतमेवदृष्ट्वा
मद्भुतमिथायतत्क्षणादेवात्मानमंतर्हितवान् प्रथमतरोभजोभावितवयविषयकप्रेमदर्शनाड्डुद्वसंस्कारस्वमंदतामाश्र
यतिहरिदश्वतदीयदृष्ट्वाविवविरम्यमानायांसंध्यायांनदिकल्पेष्विवविघटमानेषुरथांगमिथुनेषुसर्वात्मनाराजानमुपप
मायाः श्रियोवियोगादिवसंकुचत्सुकुशेशयकुलेषु निशाचरनिवर्हणजनितरुधिरजनिकरस्वसंनिधानंदयानेतिमिरलोमे
पकायिपतिकवसंबंधादिवैकीभवितुमारब्धासुहरित्सुनृपतिरुत्थायविसर्जितराजलोकोबहलदीपिकालोकविलुप्यमा
नतमिस्रयामिश्रभावेनाध्वना प्रविश्यासुरोधं देवीमपिविदितवृत्तांतामथात् ततः प्रभृतिनरपतिरतिशयिततपोभिर्विधि
वदधीतसांगनिगमैर्ब्रह्मकल्पैर्ब्राह्मणोत्तमैरजिह्मवृत्तिभिः कृतनिवाससोवाससवाग्रजस्यामासांचदेवतानांपरितोषपोषकाणिका
र्माणिनिर्मापयामास तथाहि केचिदग्निहोत्रभसितभासुरभालभूमयोरहीनरुद्राद्यसज्जोविधिवद्विहितहुताः कृतप्रत्येक

१२

मंत्रसिद्धयो यथावदनुष्ठितविविधन्यासाः क्रमोत्क्रमहोमपर्यंतो विधिमहार्घमहिमानो महारुद्रप्रयोगमयोजयन् केचन कर
कलितकनककलशालिः क्षामदविच्छिन्नधारया ब्रह्मांडमंडलनिर्गच्छन्मंदाकिनीस्रोतसेव भगवंतमपरे मंदं मंदं विस्यंदमा
नाथरघुदाददशानदीधितिव्यपदेशेनात्यंतमवदातं मंत्रार्थमिव विद्वज्जनानां संतानगोपालविद्यामावर्तयांबभूवुः अन्ये पद
वाक्यप्रमाणेषु परां निष्ठामुपसेदिवांसो बहुवारपरिशीलितयाज्यपुराणपारायणाः स्वस्वराः स्वयुक्तनिरुक्तवाचोयुक्तयोऽभि
धानेव रिन्नो मात्रामात्रमप्यप्रेशायंतो हरिवंशं शशंसुः परे जातवेदसिद्धविधौ जातवेदसिरविज्ञातं यथाभिहितं जुहवांबभू
वुः अन्ये शैवसिद्धांतप्रसिद्धवितानवैभवा अनुपजातविधिमंगलिंगसमुदायं पर्यायेण सपर्यामाहुः कतिपये ऽपशमि
तडामराडामरादियागमकुशला अथर्वशिरसः संभ्रमसहस्रादिमखेयाचंडीमाहात्म्यमावेदितमाश्वेडयांचक्रुः इत्येवंप्रायेषु चय
नायमानेषु कर्मसु कदाचिदुत्फुल्लविलोलविलोचनोत्पलाश्रवणावतंसभ्रमन्मधुकरगुंजितैः सारतरैरहस्यं जनांतरश्रवणा
द्दहंतीव शरत्सासमरतारदनकौमुदीसमुदयेनावदाततमां वाग्देवतामिव विघटयंतीं देव्या धात्रेयिका चंद्रिका नाम रह
सि राजानमभ्युपेत्यांतःपुरचारिणीभिरभियुक्ताभिः सर्वैकवाक्यतया विदितदोहदलक्षणां देवीं सविनयं निवेदयांबभूव
ततो नरपतिरगृहीतप्रामाण्यकेनापि विषयविशेषवैभवादंतःकरणोल्लासकारिणा किंपुनरसंभाव्यमानार्थ्यमभिचा
रस्य महर्षिवचसः संवादादुपजातप्रामाण्येन निश्चयेन तेन तथाविधेन तद्वचसा निरंतरमभ्यनावगाहनेनैव विहितरिवांत

त·कु·
१३
13

रपि शिशिरायमाणं सर्वावयवैः श्रमजलकणकदंतुरतया निर्गमयितुमिच्छमानमपि किंचिदिव विलंबेन निर्गतं करेणादाय लो
हितकांशुजालजटिलमंगुलीयकं तस्माद्वसंतमासस्य इवाशोकशाखायाः कुंकुमाकरणं कोरकं प्रसादमकरोत्. सा तु तस्मादं
परिहृष्टमकरंदांतरप्रतिबिंबितबालमिहिरमंडललोहितनलिनलीलाललितेन पाणिना भूमिस्पर्शपूर्वकमनेकवारान् प्र
णमंती चरणाउत्तमांगपर्यंतमवेंडदंशयमानेन नतकांतिसंतानेन समारोपितशिंजिनीगुणा कुसुमविशिखशरासनलतेव
लक्ष्यमाणा कृशांगुलियष्टिहस्ताग्रोगपतया भ्यधिकपरिमाणमपि प्रत्युरसमरीचिकरंबितत्वेन सम्यामिलितमिव दृश्यमानमंगु
लीयकमौषधाङ्कं वितशिखया करशाखया पूर्वबद्देवप्रणम्य राज्ञः संदेशेनेव करहृतिना तेन देवीमानंदयितुमंतःपुरमे
वप्रस्थयासीत्. राजा तु तत्कालोपनतममात्यवर्ग्यं बुद्धिनिधिं विलक्षणेन मुखोल्लासेन हेवंतरवाधसहकारेणानुमिततद्वृत्तां
तमपि प्रत्यादितमुदात्तमात्मानमिव मनोरथानिबंधनेनाभ्यासेन पुनरपि शाहेन विदितवृत्तांतं क्रमात्तेन समभ्यावपणकालिच
राज्यकार्याणि कृत्वा चिंतयित्वा कृत्वा च पूर्वोपक्रांतानां कार्याणां वक्तीरवस्याभिरंतरैव विश्रम्भादतिष्ठत्. अथैकदा चरमाच
लचूडांतमुपगते क्रीडेन काननकुंजरकुलेन रक्तोत्पलैः सह मिश्रिते तदुमादिव करसंपुटकरव्यापारेणाभग्ने मिहिरमंडले मित्र
वियोगापन्नवैराग्येणेव दिवसेन भूर्जत्वचीव शुष्यमाणायां संध्यायां तदभिवंदनपरेणासिद्धजनेनांजलिविलिप्ताम्बुकुंदकुसुम
पंक्तिमिव दृश्यमानासु तारकासु धूर्जटिरत्नमोहिमायां गगनचीवरं वितांबरायां तिमिरलेखायां क्रमोपचितक्रियोन्नपतिरुदि

नेऽपूर्वदिगंगनाचंदनोगण्डाभाजनेक्रमदंबाथवेशायनो चिंतायां वेलायां चंद्रकिरणप्रसंगप्रद्युम्ननिःस्यंदस्यस्फटिक
पर्वतस्येव चंद्रिकाधनरूक्मस्य थालेपस्य प्रासादस्योपरितनाट्टचंद्रशालायामवयवश्वेतद्वीपस्यैकदेशइवेंदुभ
वनस्यभागविशेषइव शेषनागस्याभावतारश्वद्वयोदन्वतोभागभेदइव गंगापुलिनस्य शयनीये सकलभुवनविज
यविश्रांतो विश्रामकामुकइव मीनकेतनो ऽभितो दीप्यमानैः प्रतापदहनप्ररोहैरिव प्रदीपैः परिवृतो वासवलभीगवा
क्षविवरप्रविष्टैरिंदुकरैर्धवलवालव्यजनैरिव वीज्यमानो जगद्विजयवैजयंतीभिरिव वितानकलंबमानमौक्तिकजा
लमंजरीभिरुपास्यमानो यामिकैरिव दूरतरनिलीनवृत्तिकैरिंद्रियैरमच्यमानो मनोभवरूपाभिमानखंडनकुपिते
नेव मनसा ऽभ्यंतरनाडीविशेषप्रवेशान्निलीयमानेन प्रपंचांतरभोगसाहायकसंपादनोद्यताभ्यामिव बहिर्विषयवि
मुखाभ्यां लोचनाभ्यां निमीलिताभ्यां बहिरिंद्रियनिरोधदौःसाधिकैरिव मदुर्गतागतबद्धावधानैः श्वाससमाहृतैर्विजय
लक्ष्मीनिर्भरपरिरंभशिथिलितैरिवावयवैः सुखमस्वपत् प्रथमसमास्फालितशेफालिकाकुसुमपरिमलोपनावि
निगृहीतावरणावशीकरे कुमुदकमलपलाशानामन्योन्यसंभवविभवक्रियाजनके निर्भरनिधुवनानुबंधविभ्र
मवतिजनगाढाह्लादकारिणि प्रवातसमपक्रांते वैभातिके नभस्वाते चक्रवाकविरहाभिचारमंत्रमिव जपत्स्वरे
रायमाणेषु कुशेशयकोरकांतरगाभितिषु मधुकरेषु विजातीयतनन्दने कद्व्यसमवेतरूपसंबंधादिव विद्राणता

मपगच्छंत्यां चंद्रिकायां मंदाकिनीपुलिनकोकमिथुनेषु विरहानलोच्छ्वासपक्ष्मलेयवपुष्मत्सु रायमाणे चरमाचलशि
त· क्रु· खरसुंदरीकर्णावतंसकेतककिसलयाकारे लंबमाने हरिणलांछनबिंबे चक्रवाकविरहदहनविस्फुलिंगकणिका
१५ स्विव विरलायमानासु कतिपयावशिष्टासु तारकासु जरदुलूककोटरप्रवेशव्यासक्तकौशिककुले मंदस्नेहतया नि
15 र्वाणाभिमुखेष्विव यतिजनालसेष्विव प्रदीपेषु विरहितसंकेतनिकुंजकेतनासु स्वभवनाभिमुखीष्वभिसारिकासु कमल
प्रबोधमंगलपाठकेष्विव विरुवत्सु तटतरुविहगेषु तिमिरलोमेष्विव भगवता भास्वता सह कलहायमानेषु मंदेहवृंदे
षु तन्नाशनिर्गलद्रुधिरधाराभिरिव लोहितायमानायां पुरुहूतहरिति प्रवर्तमाने पापहारिणि स्वाध्यायकोलाहले
त्रयीवधूश्रवणावतंसपल्लवप्रायासु ह्रियमाणास्वग्निहोत्रपावकधूमलेखासु प्रभातकल्पायां क्षपायां स्वप्नदशा
भ्यंतरे प्रभाभरोद्भासितभवनाभोगभागं मुनिसमूहेन प्रणम्यमानमुदयदहिममयूखमंडलान्निर्गम्य महस्तरं महोम
हादेवीवदनपद्मयानुदरदेशं प्रविशद्विलोकयांबभूव तावदेव प्राभातिकातोद्यनिनादेन नवघनस्तनितानुकारि
णा जयशब्दमिश्रेण च वैतालिकानां प्रबोधमंगलेन तत्क्षणमिशांसिनैव निद्रामजहात् अचिंतयच्च चेतसा किमिदमी
क्षितं मया स्वप्नप्रमाणमात्रेण फलोपधाननिश्चयस्तावदिदं वनमेवमभवतेषु भवति स्वप्नस्यायं तात्कालिकभावना
मूलकत्वसंभावनायामपि ह्मनिवचनसंवादितया न केवलमप्रामाण्यकलंकता वेवनितेभ्यो मर्हः संति च तादृशानि कानि १५

चिन्ताकृततनुःकृतानियानिसम्प्रमात्रभोगपमेवफलंप्रसवनतश्चापिश्रूयन्तेऽत्यागमप्रवादाः वेलाचेयंप्रभातप्रायायस्यांस्व
प्नदर्शनंफलंनव्यभिचरतीत्याचक्षतेविसंवादहीनवचसश्चादिविकल्पयन्तेवोकटस्मप्रफलोपधानकोटिकस्तानात्ति
मितमानसोऽयथाविहितमदर्मेवकार्यमन्वतिष्ठत् देवीततःप्रभृतिहृष्टैरुपदिशन्नर्मानन्वतिष्ठत् तथाहि प्राभा
तिकतरुच्छायेवनहृदमूलमाश्रयत् चक्रवाकीवसंध्यासमयेविप्रकाहाराऽस्मभवत् कमलमयीवनोत्पलवलमशा
लसंयोगंलेभे स्थलकमलिनीवनजलाशयंजगाहेविभातवेलेवनविर्जनंनिशान्तमासत्तादस्यगलतेवानोद्वेगमभजत्
बालार्कचस्थलीवनकरजरमान्वयमसदिष्टपद्मिनीवनदिवसमशमिष्टशिशिरनिशीथिनीवनत्यायाममतेनात् दे
वतीवनोत्सुकमथस्मकार देवदिव्रितेवनकल्समाचक्रामविनीतेवनभूतौविश्रममातताननकलिमितेवनतपमाल
लंबेह्मयंतीवनकलिंसेदैन्येयात्यिकीवनावयवभंगमंगीचकार देवयानीवनमन्मथकचाद्वात्मप्यासांचक्रेनिद्रा
वकालकलेवनाश्रुविलमाशिश्रियेचंद्रकलेवनविरंवरात्स्यौ परुषाहृत्तिरिवशयनवेलायांसरसपदानासीत् भू
मिरिवनामंगलांगिरमश्चाररायामासमृगव्येवनयीरंजहास तारेवग्रहसंश्लेषणायामवधानंबबंध अपिच सर्वौषधिमि
श्रेणपवित्रेणवारिणास्नातिसमंगलतराशेषधीमेणीस्त्रांगेषुदधार अहरहर्महान्तिवस्त्रनिश्रोत्रियेभ्योविश्राणया
मास तत्रीयासत्रतेनभगवतींकुमारजननींपरितोषयांचकार राजापिगर्भवेशाप्रभयेनतदभिप्रायवेदिनीभिरं

त·मं·
१५
15

तःप्रभृतिकौमिभिर्निर्विद्यमानमर्थजातं प्रतिदिनमपरिहीयमानमाहारयांबभूव अथ देव्याः प्रवहन्नेहसि निश्वाससौरभानुसा
रिमधुकरनिकुरंबकैतवेन स्तनचूचुकच्छलेन च तदंतर्गतविविक्तदंशाप्रसरदंशुजालनिरस्तं तिमिरमिव निरगात् तस्मि
यान्निर्हन्तं चक्रवाकमिथुनमिव पयोधरयुगं पीनतोपचयमापेदे विकसितमुखकमलाम्भोजिनीवाजृम्भत राजकरस्प
र्शयोग्यात्कुमुदिनीव कलेवरलतामंदतामापेदे संनिहिततनुदयापौरंदरीहरिदिवावदाता बभूव तस्मीविनिचयकं
चुकिताद्यौरिव विभ्रमणानलस्य निवहमजहात् तस्माधिसमाहितमानसा तपस्विसंसदि वनवघनानि विरचयामासा
तदानीं च नृपतिस्त्रिविक्रमलीलामिव बलिविलयशालिनीम् कुनृपतिसंपदमिव परिजनकरग्रहणमात्रसंचारिणीम्
प्रसन्नकवितामिव मंदायमानपदन्यासां पवनगतिमिव निसर्गादूर्ध्वगमनासमर्थाम् मीमांसामिव प्रकरणदुर्बलक्रमां
सरसीमिव स्तगुरुतरोदरां मंदाकिनीमिवांतःसंदानितकुमारां केकेयीमिव जातमंथरोल्लासाम् कुंतीमिव पृथुतपां
डुभावां रुक्मिणीमिव कृष्णाकलितकुचाग्रां ग्रन्थिकबुद्धिमिव निरालंबनस्थितिमसहमानां हिमवत्सानुमवमिव नि
वहविविधसिद्धौषधिं वेलामिव ग्रहापहारिमणिगणप्रसाधितां नीतिमिव कृतमंत्ररक्षां गोपालबालकेलिमिव वि
हितस्तनानिरासोपायां देवीमलयवतीमाकलयन्निलयमभूत् तः सकलानां श्वोवसीयसानां समपद्यत साच निर्गम
नसमनंतरमेव कुमारमालिलिंगितकामायाः कीर्तेः कांतेव जगद्विजयश्रियः स्मितरुचेव भ्रमेः कर्णावतंसकेतक १५

परागेणेव स्मरसन्मागात्रविस्फुरितेन सारराजसेव धृतिवधाः कुंकुमचंदनद्रवेणेव औदार्यचंद्रमसः प्रदर्नेद्रकयेव धैर्यो
दधेः फेनपटलेनेव माधुर्यमंदारस्तबकसममसमस्तेनेव सप्तकालेकवलीकृतस्पक्रमदवंधोः कौमुदीसमुदयेनेव अव
गाह्यमानानंददुग्धोदन्वदुत्कलिकाकलापेनेव दुग्धसमानकेसरिकामिनीपयोरसेनेव परिनिष्ठानां कुलप्रसूतिदेवता
नां प्रसादावदाताभिरपांगभंगिभिरिव धवलतामंगीचकार ॥ अथासतमेष्वनेकशः कृतकुमारभृत्याकर्मसु संनिक
र्षमाकलयत्सु गदंकारेष्वधिकवद्धावधानासु हृद्वथाग्रीष्मामेवे जनने मासि शंकयंत्रादिभिरविसंवादिभिरुपाये
राकलितायां कालकलायां ग्रहगतिगणितागमाग्रगण्यैर्गणकगणैर्भागशो गृहीते लग्ने सार्वभौमाविर्भावयोग्यायां
वेलायां समुपकल्पिते कुमारजन्मोपयोगिन्युपकरणे जाते मंदमंदमनुभूयमानायां प्रसववेदनायामौत्सुक्याकलितेषु स
कलांतःपुरलोकेषु मंदाकिनीव स्कंदं रेणुकेव रामं कौशल्येव दशास्यशासनं रोहिणीव रेवतीरमणं देवकीव दानव
सूदनं पुलोमजेव जयंतं शाकुंतलेव भरतं कुंतिभोजसुतेव धनंजयं महादेवी मलयवती सकलजलधिवलयवसुंधरा
सुधामनाईस्तनयमसूत ॥ ततः ससंभ्रमचलदवरोधसुंदरीजनमुक्तावलीगलितमुक्ताजालकैर्लाजसुमनोभिस्संभ्रमकी
र्यमाणावरोधांगणः ससंभ्रमिषद्भिर्माणिकमहद्वैः सिंदूरपरागैस्स्थगितगगनाभोगः वादित्रसंतानविराणैर्लोक
कोलाहलैस्समाक्रम्यमाणदिक्चक्रः श्रोत्रियैरथर्वज्ञैरभिसमाधीयमानबालग्रहः राजा हृदयेन विग्रहेणच क्रिय

न·कु·
१९
16

माणस्नावगाहनः पुरोधसावावेध्यकरनालिकाभिस्संप्रीयमाणशशिबिंबमंडलः द्विजगणैः प्रियश्रोत्रभिश्रयथास्सहस्रु
स्रमाणमहाधनशर्णीपात्रः कारानिरुद्धैर्जनानंदैश्चविमुच्यमानशृंखलः भूषणगणैर्जनसमाजेभ्यः कंचुकितांगनःसम
रइवविलंब्यमानरथ्यः अहंयासइवबाध्याबाध्यविवेकविकलः वसंतोत्सवइवगीयमानबहलाश्लीलपदकः कलिका
लइवानवद्यमानकुलप्रवतिवेश्याविशेषः वेतालावेशइवोन्मादितजनः जलधिरिवसर्वतोमुखदानतर्पितवाडवः
म्लेच्छदेशइवसंजायमानानेकमातंगब्राह्मणसंबंधः सूर्योदयइवसमंताद्दिश्याप्यमानांशुकः अविवेकइवाविशेषदृ
श्यमानसवर्णाडर्वर्णः अश्वमेधप्रयोगइवपुंश्चलीविधीयमानब्रह्मचारिसमाक्रोशः पवनप्रचारइवनिवारितवाह्या
भ्यंतरप्रवेशः हंससंघइवमाणवकक्रीडिताकुलः नभस्सनदीशरइवनिर्मर्यादवृद्धः वसुदेवोद्वारविधिरिवदीयमा
नरोहिणीलदः अद्भुतोदयइवदृश्यमानद्विजराजभूमिसंसर्गः अष्टावक्रसंवादइवमहीयमानवंद्युपशोभितः रामाय
णसंग्रामइवक्रियमाणयातुधानप्रतिकूलप्रयोगः वैयाकरणविषयविशेषइवांतरंगबहिरंगविचारहीनः शर्याति
यागइवप्रमोदोच्चलदस्त्रः समुद्रकूलदिदेशइवांतर्गतानेकमहीभृत्प्रियः यवक्रीतकथाबंधइवार्वावसुपरितोषितदेव
पितृकः जैमिनीयप्रयोगइवाडर्लभदृष्टांतोपनयः अमृतमथनसमयइवविभाव्यमानलक्ष्मीस्वरूपः वेदांतनिबंधइवा
परिस्फुरन्मायमानाकः दमयंतीपरिणयइवदृश्यविधयानादृतदिक्पालः त्रिपुरदाहइवमहासंभ्रममयः राजसूय १९

रवदलयस्पथतिमिष्टिंदधानः सोमवपरवनिहतप्रतिरथानकंडंडमिः निवातकवचनिवर्हणा दिवसरवपरुहूतसूना
मिनेयमानविजयः कुमारजननोत्सवः प्रावर्तत ॥ यत्रसतंत्रीकृतनगतयश्चित्ररथाग्रेसरागन्धर्वादिविगायंतोभविच
दीयमानाग्रहर्षपंत लसतिलकावर्हिर्मिवरर्षणाद्यासरोगणाग्रेनविहेन्नरसंतः दितोचप्रवर्हंतो(वि)विचदीयमानाग्र
हर्षपंत) ऽलसंत यत्रचसरासरमथ्यमानमहार्णवसमुद्गीर्णकोलाहलायंकयामंदरकंदरामंतरनिवासिनाकेस
रिकुलेन कैटभांतकप्रयुक्तसदर्शनोन्मुक्तदानवीजनगर्भस्रावनिदानप्रचंडाट्टहासविभ्रमेणावलिनिलयालयेनदा
नवगणेन समसत्त्विसमयसमदितपुष्करावर्तकप्रभृतिपयोधरस्तनितप्रतिपन्नादिम्बारणा निर्वहेन हिरण्यपुरम
थनप्रहृष्टपार्थप्रयुक्तपाशुपतप्रहरणाप्रकाशितविश्वंभरेलप्रणादडुआपारावारोदरहतिमिभिर्जरन्नरग्राहैः शेषथीसमा
हरणोद्यतहनुमत्सिंहनादध्वांतालंकानिलयेननिशाचरनिचयेन दाशरथिभुजसमाकर्षणाभज्यमानधूर्जटिधनु
र्ध्वनिधियामहेंद्रादिवद्धसमाधिनाभगवताभार्गवेण एवंपरश्चचरणांगुष्ठपीडितदशवदननिःसृतनिष्ठुरविना
दननीघयाकैलासनिवासिनाप्रमथप्रथेनप्रयमाणोमहतामानोद्यानोनिनादःसमुल्लसितवान् ॥ यत्रचसविला
६ सवाडवहिसमदेहलनविधासचंपकदोलामयमिवविलोचनावर्तितेषुनीलोत्पलमयमिवाकाशंदर्शयंत्योमंजीरशिं
ध.श्री. जितेषुचरणाभ्रमितलाभिहतवेदनामिवावेदयंत्यो निःश्वाससमारुतामोदसमावर्जितमधुकरकुलगीतडंदयदङ्गरं

त·कु·
२
17

तदमरुद्धिधीयमानस्वेदवारिबिंडप्रतिक्रियास्तद्वयमेलाखिवभ्रमणलीलास्वनिपतितकर्णावतंसकेतकीकिसलयैर्यथं नो
मनोसिकापत्रैरिवदारयंतोप्रमिविश्रमेषुपिकर्णोत्पलकवरीकुसुममिलनेनानवाप्तमवेवियोगदुःखेभ्रमरारभसम
ग्रहारमौक्तिकजालकैः सामाजिकानां मनोनिवासिनं मकरकेतनं कुसुमांजलिभिरिवार्चयंत्यो वलयावलीकलकलैः
सहस्रदीधितिमिलनवांछयेवोपरिप्रतिष्ठसमानामंबरकोकनदानामद्भुमननोदौमिवविभावयंत्यो वारवर्णिन्यः
समनृत्यन् ॥ अथ प्रमदपरवशो नरपतिराहितस्नानो विशदांबरसंवीतस्सौरभेयीरूपविमेयास्तपनीयं चागणनीयं श्रो
त्रियेभ्यो विश्राण्य बुद्धिनिधिना सार्द्धमंतः प्रविश्य प्रसवपीडया परिणामशिथिलावयवां प्रभायाः प्रभावस्य चातिशयप्रशा
न्तिमिर्मणिगणैर्मंगलप्रदीपप्रतिबिंबैरिवशोभमानां समुद्रांतर्भूमिमिवोत्पादितपीयूषधामिंदुकलामिवविभावितप्र
काशां वीरुधमिव स्फुटीकृतफलां बुद्धिमिवविहिताभ्यवसायां स्वरभित्स्फुकारावलीमिवानुभूतप्रसवोदयावस्थां स
मेरुमूर्तिमिव धात्रीमध्यस्थितनंदनभवमिव संगतसंतानां देवीतदंकवर्तिनमेकीभूतमिवस्वानुरागसमुदायं प्रसाद
वशात्प्रयासमग्रमिव विभातविवस्वंतं तेजोदार्यावर्जितमिव कल्पपादपपल्लवं प्रयोधदलशयनलीलाकालिकमिव बा
लवेषमादिपुरुषं त्रिदशामोहनाय शठीनामेकभावमिव नीललोहितं तिरोहितमप्रवोनरमिव कार्त्तिकेयं कुमारमा
कलय्य समत्ताविनिमेषविरहानंदबाष्पाभ्यांचेतसि कंदलवतानंदेनवचसि गद्गदिकयावगुष्ठिवेपथुनाचयुगपमर्य २

दृश्यतां ततो हरिविरिंचिः सानंदं राजानमभ्यधत्त देव दृश्यतामस्य कुमारस्य जननाव्यवहितोग्रमेव कुमारस्यैव सर्वाभि
भावी महाननुभावविशेषः तथाहि प्रभातप्रभाकरस्येव प्रसर्पतो प्रभा प्रदीपानां प्रकाशमपकर्षमापादयति अस्य
टकंठस्यापि कहदितध्वनिर्बालकेसरिगर्जितमनुहरति गंभीरतया लोचनानंदजनकोपि तेजोविशेषेणाभिलक्ष्या
णोस्य वपुषः परिक्षोभमिव प्रसूते कौस्तुभमणिरिव नारायणावक्षःस्थलमस्य मूर्धेमिहिर इव गगनतलं प्रभया वासभव
नांतरमभितः समुद्भासयति इमेस्यांधकारांकुराइकारतिरोधानकुशलाः कुंचिताः केशाः इदं च चक्रवाकचंचुदलि
तमृणालसंबंधिकतिपयसूत्रसमुदायविकंपद्माकरप्रतिबिंबितं शशलांछनशकलमिवास्य विभातिरमणीयं
भालतलं इयं च तनीयसी नीलमणिमरीचिशलाकेव विभ्राजतेस्य भ्रूलेखा इदमस्यावदातीकरोति गर्भनिकेतनं विक
चकेतकीकुसुमकिसलयानुकारि लोचनयुगं पश्यास्य नासावंशमादितोतिदीर्घफलसंभावनासंभावयदेव भातुकमुद्भा
वयति एतदस्याननतिचिरसमासादितलम्बरसंसीकरकरंबितं रदनव्यतिरेकेपि स्मितच्छायाच्छुरितमिव विलसति वि
मलमौक्तिकपद्मरागरुचकरुचिरमधरबिम्बम् इदमस्य बालरूपस्य भगवतो विश्वरूपस्य शयनानुरूपतया संश्लिष्ट
शेषभोगसमानाभोगं भाति भुजद्वयं इदं चास्य कुलिशलांछितं कौशिकस्येव कुशेशयमधुरं मधुरिपोरिव मसृ
णलेखं सविस्फुरतिमीनसंगतं कमलमिव पुरस्तादस्यंतनिरवकाशतया भीतयेव बद्धमुष्टितया परिहीनकर

अगलम् इमेस्य करतलमिलितोऽञ्जलीदलनयानतसंगतानवमशरावासक्तसरोरुहकेसरप्रसराइव प्रसर्पंति इदमस्यांप्र

न·कु· तिकपरिणाहायाससौरेणाप्रमेयभाविपरिणाहमालभ्यतेवत्सललाटम् एतदस्याचिरविनाकृतनालं नारायणीयमिव नाभि

१८ मंडलं इदं च कोकनदकोमलमूर्द्धरेखावैजयंतीशतकोटिछत्रलांछनं राजसमाजशेखरकुसुमकेसराकर्दवप्रतरूक्रियो

14 पपन्नवमश्रवेनिकुरंबकं चरणद्वयं इदं च सुंदरीवदनमिव सिंहरविडंबना गिरिगह्वरगृहमिव केसरिकिशोरकेणध्वजंदिज

टामंडलमिव कलामात्रेण प्रालेयभानुभासा खणमिव स्कंदेन नंदगोपमंदिरमिवारविंदनयनेन सनंदनेनाप्यधिष्ठित

मनेन तथा मम समधिकं मधुरतमसस्य भावं च ददाति अयं च कर्ण इवासन्नर्जनदृष्टिः अर्जुन इव निर्जितपरिणतहिरण्यपुरः

भीष्म इव वाहिनीपतिमहिषीसंप्रसूतः नल इव निरस्तद्वापरसहायतेजोविशेषः भरत इव बाल्य एवाधिगतसर्वदमन

भावः हरिश्चंद्र इव विश्वामित्रपरितोषणयोग्यः प्रद्युम्न इव शंबराजिकरः हनुमानिवार्भकभावेपि भास्वत्पराभवाभिमा

नः स्कंद इवावत्तानवक्रौंचगसंभवः प्रतिभाति कुमारः इत्यभिधुसत्यधर्मायस्मायमन्ववायोयतः सुधादीधितिरिवमहेश्वर

शिरोमहितोऽयं प्रादुर्भूतः गुणपवतीचेयंवसुंधरायत्रायं बाललीलावहेलितमहेंद्रानुभावो भगवान्कैटभारातिरिवावती

र्णः सुकृतविशेषशालीनि च लोकलोचनानि याति निदर्शनमात्राप कुष्टमदनं मृगांकमौलिमिवैनमनंतरायमाकलयि

ष्यंतीति राजा ततनन्तरं ध्यप्रसादालसपोधनाश्रममिधायकांचित्कालकलां विश्रम्य ततो निरगात् अथ पंचमाव्यवहितो

नरहृतैसमपागतेदिवसउत्सववशात्सर्वलोकेपिदीप्यमानासुदीपिकासिवतारकासुवेचिततारकावराटकावयवाया
मतिरोहितगोमयमूर्तौमातासुषष्ठीदेव्यामिवप्रकाशमानायांप्रदोषसंध्यायांप्रस्तुतकाविष्णनिशाचरेषिवदीपप्रकाशे
ननिराक्रियमाणेषुतिमिरनिकुरंबकेषुपरितस्त्वबालमातृकाहासभासीवककुभिसर्वस्पष्टदृश्यमानायांकुमुदवांधव
ज्योत्स्नायांसन्निहितघाणप्रवेशिवपरितोवामरत्यन्त्सवादित्रनादश्राविष्णकलापिकुलेषुसमस्तलक्ष्मीविलेदनभयादिवदत्त
महेश्वरविद्वेषु शाह्यागमस्वाभ्यासदृश्यमानषष्ठीकः तारकवधसमयस्वाभ्यर्च्यमानबाहुलेयः मायावतीप्रयत्नस्व
वमहीयमानप्रद्युम्नः ज्वलनप्रयाणसमयस्वविजृंभमाणमहाश्वागशाहः साहित्यप्रपंचस्वदीपकाविर्भावभव्यः
समरस्वदृश्यमानप्रवृत्ततोपदः हलधरनिवासस्वसंनिहितमुशलः लिंगागमस्वबध्यमानेवस्त्रीपुंनपुंसकश
ब्दः विद्वत्संगस्वविधीयमानविविधपदार्थप्रतिपादनः देव्यावासस्विवेशनिचविलोकमानवरवर्णिनीमयभावः
सूतिकागृहेजनदृदयेचदृश्यमानारिष्टसिद्धार्थसद्भावः कोषागारैर्लोकलोचनैश्चविमलकमदः स्वरूपतःप्रतिकृतौना
वेसमाणकुमारसहायदेवीकः श्रोत्रियैर्लोकैश्चकल्प्यमानागमकोलाहलः श्राम्यणेर्वाटकैश्चसमग्रघुष्यमाणस्वरनाभि
धानसहस्रः पुरोहितैर्महाजनैश्चक्रियमाणदोषाभिघातः समहाजन्मोत्सवः प्रवर्तते ॥ ततोतिक्रांतेदशमेहनिशोभना
यांवेलायांकर्माणिपरांनिष्ठामासेदुषाब्राह्मणजनेनसंपादितेषुयथायोग्येषुकर्मसुसकलाचारकुशलाभिज्ञाः वि

त॰कु॰ क्लिन्नसंप्रदायाभिर्जरतीभिरनुष्ठितेषु लौकिकाचरणेषु राज्ञा नानाजातीयमर्थसार्थं सार्थवेदाध्यायिभ्यो ब्राह्मणेभ्यः प्रति
